श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्महाभारते शान्तिपर्वणि मोक्षधर्मपर्वणि

॥ श्री हयशिरोपाख्यानम् ॥

(नारायणीयम्)

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री हयशिरोपाख्यानम् ॥

(नारायणीयम्)

शौनक उवाच

श्रुतं भगवतस्तस्य माहात्म्यं परमात्मनः।
जन्म धर्मगृहे चैव नरनारायणात्मकम् ॥ 1 ॥

महावराहसृष्टा च पिण्डोत्पत्तिः पुरातनी।
प्रवृत्तौ च निवृत्तौ च यो यथा परिकल्पितः ॥ 2 ॥

तथा स नः श्रुतो ब्रह्मन् कथ्यमानस्त्वयाऽनघ।
हव्यकव्यभुजो विष्णुरुदक्पूर्वे महोदधौ ॥ 3 ॥

यच्च तत् कथितं पूर्वं त्वया हयशिरो महत्।
तच्च दृष्टं भगवता ब्रह्मणा परमेष्ठिना ॥ 4 ॥

किं तदुत्पादितं पूर्वं हरिणा लोकधारिणा।
रूपं प्रभावं महतामपूर्वं धीमतां वर ॥ 5 ॥

दृष्ट्वा हि विबुधश्रेष्ठमपूर्वममितौजसम्।
तदश्वशिरसं पुण्यं ब्रह्मा किमकरोन्मुने ॥ 6 ॥

एतन्नः संशयं ब्रह्मन् पुराणं ब्रह्मसम्भवम्।
कथयस्वोत्तममते महापुरुषसंश्रितम्।
पाविताः स्म त्वया ब्रह्मन् पुण्याः कथय ताः कथाः ॥ 7 ॥

सौतिरुवाच
कथयिष्यामि ते सर्वं पुराणं वेदसम्मितम्।
जगौ यद् भगवान् व्यासो राज्ञः पारीक्षितस्य वै॥ **8**॥

श्रुत्वाऽश्वशिरसो मूर्तिं देवस्य हरिमेधसः।
उत्पन्नसंशयो राजा एतदेवमचोदयत्॥ **9**॥

जनमेजय उवाच
यत्तद् दर्शितवान् ब्रह्मा देवं हयशिरोधरम्।
किमर्थं तत् समभवद् वपुर्देवोपकल्पितम्॥ **10**॥

वैशम्पायन उवाच
यत् किञ्चिदिह लोके वै देहबद्धं विशाम्पते।
सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः॥ **11**॥

ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट्।
भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च॥ **12**॥

भूतप्रलयमव्यक्तं शृणुष्व नृपसत्तम॥ **13**॥

धरण्यामथ लीनायामप्सु चैकार्णवे पुरा।
ज्योतिर्भूते जले चापि लीने ज्योतिषि चानिले॥ **14**॥

वायौ चाकाशसंलीने आकाशे च मनोऽनुगे।
व्यक्ते मनसि संलीने व्यक्ते चाव्यक्ततां गते॥ **15**॥

अव्यक्ते पुरुषं याते पुंसि सर्वगतेऽपि च।
तम एवाभवत् सर्वं न प्राज्ञायत किञ्चन॥ **16**॥

तमसो ब्रह्म सम्भूतं तमोमूलामृतात्मकम्।
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमाश्रितम्॥ **17**॥

सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधानं प्रचक्षते।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम॥ **18** ॥

विद्यासहायवान् देवो विष्वक्सेनो हरिः प्रभुः।
आदिकर्ता स भूतानामप्रमेयो हरिः प्रभुः॥ **19** ॥

अप्स्वेव शयनं चक्रे निद्रायोगमुपागतः।
जगतश्चिन्तयन् सृष्टिं चित्रां बहुगुणोद्भवाम्॥ **20** ॥

तस्य चिन्तयतः सृष्टिं महानात्मगुणः स्मृतः।
अहङ्कारस्ततो जातो ब्रह्मा शुभचतुर्मुखः।
हिरण्यगर्भो भगवान् सर्वलोकपितामहः॥ **21** ॥

पद्मेऽनिरुद्धात् सम्भूतस्तदा पद्मनिभेक्षणः।
सहस्रपत्रे द्युतिमानुपविष्टः सनातनः॥ **22** ॥

ददृशेऽद्भुतसङ्काशो लोकानाप्याययन् प्रभुः।
सत्त्वस्थः परमेष्ठी स ततो भूतगणान् सृजन्॥ **23** ॥

पूर्वमेव च पद्मस्य पत्रे सूर्यांशुसप्रभे।
नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ॥ **24** ॥

तावपश्यत् स भगवाननादिनिधनोऽच्युतः।
एकस्तत्राभवद्बिन्दुर्मध्वाभो रुचिरप्रभः॥ **25** ॥

स तामसो मधुर्जातस्तदा नारायणाज्ञया।
कठिनस्त्वपरो बिन्दुः कैटभो राजसस्तु सः॥ **26** ॥

तावभ्यधावतां श्रेष्ठौ तमोरजगुणान्वितौ।
बलवन्तौ गदाहस्तौ पद्मनालानुसारिणौ॥ **27** ॥

ददृशातेऽरविन्दस्थं ब्रह्माणममितप्रभम्।
सृजन्तं प्रथमं वेदांश्चतुरश्चारुविग्रहान्॥ 28॥

ततो विग्रहवन्तस्तान् वेदान् दृष्ट्वाऽसुरोत्तमौ।
सहसा जगृहतुर्वेदान् ब्रह्मणः पश्यतस्तदा॥ 29॥

अथ तौ दानवश्रेष्ठौ वेदान् गृह्य सनातनान्।
रसां विविशतुस्तूर्णमुदक्पूर्वे महोदधौ॥ 30॥

ततो हृतेषु देवेषु ब्रह्मा कश्मलमाविशत्।
ततो वचनमीशानं प्राह वेदैर्विनाकृतः॥ 31॥

ब्रह्मोवाच।
वेदा मे परमं चक्षुर्वेदा मे परमं बलम्।
वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तरम्॥ 32॥

मम वेदा हृताः सर्वे दानवाभ्यां बलादितः।
अन्धकारा हि मे लोका जाता वेदैर्विना कृताः॥ 33॥

वेदानृते हि किं कुर्यां लोकानां सृष्टिमुत्तमाम्।
अहो बत महद् दुःखं वेदनाशनजं मम॥ 34॥

प्राप्तं दुनोति हृदयं तीव्रशोकपरायणम्।
को हि शोकार्णवे मग्नं मामितोऽद्य समुद्धरेत्॥ 35॥

वेदांस्तांश्चानयेन्नष्टान् कस्य चाहं प्रियो भवे।
इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम॥ 36॥

हरेः स्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर।
ततो जगौ परं जप्यं साञ्जलिप्रग्रहः प्रभुः॥ 37॥

ब्रह्मोवाच।
ओं नमस्ते ब्रह्महृदय नमस्ते मम पूर्वज।
लोकाद्य भुवनश्रेष्ठ साङ्ख्ययोगनिधे प्रभो॥ **38** ॥

व्यक्ताव्यक्तकराचिन्त्य क्षेमं पन्थानमास्थित।
विश्वभुक् सर्वभूतानामन्तरात्मन्नयोनिज।
अहं प्रसादजस्तुभ्यं लोकधाम स्वयम्भुवः॥ **39** ॥

त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम्।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनम्॥ **40** ॥

त्वत्प्रसादात् तु मे जन्म तृतीयं वाचिकं महत्।
त्वत्तः श्रवणजं चापि चतुर्थं जन्म मे विभो॥ **41** ॥

नासिक्यं चापि मे जन्म त्वत्तः पञ्चममुच्यते।
अण्डजं चापि मे जन्म त्वत्तः षष्ठं विनिर्मितम्॥ **42** ॥

इदं च सप्तमं जन्म पद्मजन्मेति वै प्रभो।
सर्गे सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जित॥ **43** ॥

प्रथमः पुण्डरीकाक्षः प्रधानगुणकल्पितः।
त्वमीश्वरः स्वभावश्च भूतानां त्वं प्रभावन॥ **44** ॥

त्वया विनिर्मितोऽहं वै वेदचक्षुर्वयोतिग।
ते मे वेदा हृताश्चक्षुरन्धो जातोऽस्मि जागृहि।
ददस्व चक्षूंषि मम प्रियोऽहं ते प्रियोऽसि मे॥ **45** ॥

एवं स्तुतः स भगवान् पुरुषः सर्वतोमुखः।
जहौ निद्रामथ तदा वेदकार्यार्थमुद्यतः॥ **46** ॥

ऐश्वर्येण प्रयोगेण द्वितीयां तनुमास्थितः।
सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः॥ 47॥

तस्य मूर्धा समभवद् द्यौः सनक्षत्रतारका।
केशाश्चास्याभवन् दीर्घा रवेरंशुसमप्रभाः॥ 48॥

कर्णावाकाशपाताले ललाटं भूतधारिणी।
गङ्गा सरस्वती पुण्ये भ्रुवावास्तां महाद्युती॥ 49॥

चक्षुषी सोमसूर्यौ ते नासा सन्ध्या पुनः स्मृता।
ओङ्कारस्त्वथ संस्कारो विद्युज्जिह्वा च निर्मिता॥ 50॥

दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः।
ग्रीवा चास्याभवद् राजन् कालरात्रिर्गुणोत्तरा॥ 51॥

एतद्धयशिरः कृत्वा नानामूर्तिभिरावृतम्।
अन्तर्दधौ स विश्वेशो विवेश च रसां प्रभुः॥ 52॥

रसां पुनः प्रविष्टश्च योगं परममास्थितः।
शैक्ष्यं स्वरं समास्थाय उद्गीतं प्रासृजत् स्वरम्॥ 53॥

स स्वरः सानुनादी च सर्वशः स्निग्ध एव च।
बभूवान्तर्जलगतः सर्वभूतगुणोदितः॥ 54॥

ततस्तावसुरौ कृत्वा वेदान् समयबन्धनान्।
रसातले विनिक्षिप्य यतः शब्दस्ततो द्रुतौ॥ 55॥

एतस्मिन्नन्तरे राजन् देवो हयशिरोधरः।
जग्राह वेदानखिलान् रसातलगतान् हरिः॥ 56॥

प्रादाच्च ब्रह्मणे भूयस्ततः स्वां प्रकृतिं गतः ॥ 57 ॥

स्थापयित्वा हयशिरा उदक्पूर्वे महोदधौ।
वेदानामालयश्चापि बभूवाश्वशिरास्ततः ॥ 58 ॥

अथ किञ्चिदपश्यन्तौ दानवौ मधुकैटभौ।
पुनराजग्मतुस्तत्र वेगितौ पश्यतां च तौ।
यत्र वेदा विनिक्षिप्तास्तत् स्थानं शून्यमेव च ॥ 59 ॥

तत उत्तममास्थाय वेगं बलवतां वरौ।
पुनरुत्तस्थतुः शीघ्रं रसानामालयात् तदा ॥ 60 ॥

ददृशाते च पुरुषं तमेवादिकरं प्रभुम्।
श्वेतं चन्द्रविशुद्धाभमनिरुद्धतनौ स्थितम्।
भूयोऽप्यमितविक्रान्तं निद्रायोगमुपागतम् ॥ 61 ॥

आत्मप्रमाणरचिते अपामुपरि कल्पिते।
शयने नागभोगाढ्ये ज्वालामालासमावृते ॥ 62 ॥

निष्कल्मषेण सत्त्वेन सम्पन्नं रुचिरप्रभम्।
तं दृष्ट्वा दानवेन्द्रौ तौ महाहासममुञ्चताम् ॥ 63 ॥

ऊचतुश्च समाविष्टौ रजसा तमसा च तौ।
अयं स पुरुषः श्वेतः शेते निद्रामुपागतः ॥ 64 ॥

अनेन नूनं वेदानां कृतमाहरणं रसात्।
कस्यैष को नु खल्वेष किञ्च स्वपिति भोगवान्।
इत्युच्चारितवाक्यौ तौ बोधयामासतुर्हरिम् ॥ 65 ॥

युद्धार्थिनौ हि विज्ञाय विबुद्धः पुरुषोत्तमः।
निरीक्ष्य चासुरेन्द्रौ तौ ततो युद्धे मनो दधे ॥ 66 ॥

अथ युद्धं समभवत् तयोर्नारायणस्य वै ॥ 67 ॥

रजस्तमोविष्टतनू तावुभौ मधुकैटभौ।
ब्रह्मणोपचितिं कुर्वन् जघान मधुसूदनः ॥ 68 ॥

ततस्तयोर्वधेनाशु वेदापहरणेन च।
शोकापनयनं चक्रे ब्रह्मणः पुरुषोत्तमः ॥ 69 ॥

ततः परिवृतो ब्रह्मा हरिणा वेदसत्कृतः।
निर्ममे स तदा लोकान् कृत्स्नान् स्थावरजङ्गमान् ॥ 70 ॥

दत्त्वा पितामहायाग्र्यां मतिं लोकविसर्गिकीम्।
तत्रैवान्तर्दधे देवो यत एवागतो हरिः ॥ 71 ॥

तौ दानवौ हरिर्हत्वा कृत्वा हयशिरस्तनुम्।
पुनः प्रवृत्तिधर्मार्थं तामेव विदधे तनुम् ॥ 72 ॥

एवमेव महाभागो बभूवाश्वशिरा हरिः।
पौराणमेतत् प्रख्यातं रूपं वरदमैश्वरम् ॥ 73 ॥

यो ह्येतद् ब्राह्मणो नित्यं शृणुयाद् धारयीत वा।
न तस्याध्ययनं नाशमुपगच्छेत् कदाचन ॥ 74 ॥

आराध्य तपसोग्रेण देवं हयशिरोधरम्।
पाञ्चालेन क्रमः प्राप्तो रामेण पथि देशिते ॥ 75 ॥

एतद्धयशिरो राजन्नाख्यानं तव कीर्तितम्।
पुराणं वेदसमितं यन्मां त्वं परिपृच्छसि ॥ 76 ॥

यां यामिच्छेत् तनुं देवः कर्तुं कार्यविधौ क्वचित्।
तान्तां कुर्याद् विकुर्वाणः स्वयमात्मानमात्मना ॥ 77 ॥

एष वेदनिधिः श्रीमानेष वै तपसो निधिः।
एष योगश्च साङ्ख्यं च ब्रह्म चाग्र्यं हरिर्विभुः॥ 78॥

नारायणपरा वेदा यज्ञा नारायणात्मकाः।
तपो नारायणपरं नारायणपरा गतिः॥ 79॥

नारायणपरं सत्यमृतं नारायणात्मकम्।
नारायणपरो धर्मः पुनरावृत्तिदुर्लभः॥ 80॥

प्रवृत्तिलक्षणश्चैव धर्मो नारायणात्मकः।
नारायणात्मको गन्धो भूमौ श्रेष्ठतमः स्मृतः॥ 81॥

अपां चापि गुणा राजन् रसा नारायणात्मकाः।
ज्योतिषां च परं रूपं स्मृतं नारायणात्मकम्॥ 82॥

नारायणात्मकश्चापि स्पर्शो वायुगुणः स्मृतः।
नारायणात्मकश्चैव शब्द आकाशसम्भवः॥ 83॥

मनश्चापि ततो भूतमव्यक्तगुणलक्षणम्।
नारायणपरः कालो ज्योतिषामयनं च यत्॥ 84॥

नारायणपरा कीर्तिः श्रीश्च लक्ष्मीश्च देवताः।
नारायणपरं साङ्ख्यं योगो नारायणात्मकः॥ 85॥

कारणं पुरुषो ह्येषां प्रधानं चापि कारणम्।
स्वभावश्चैव कर्माणि दैवं येषां च कारणम्॥ 86॥

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च तथा चेष्टा दैवं चैवात्र पञ्चमम्॥ 87॥

पञ्चकारणसङ्ख्यातो निष्ठा सर्वत्र वै हरिः।
तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः॥ 88॥

तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः।
ब्रह्मादीनां स लोकानामृषीणां च महात्मनाम्॥ 89 ॥

साङ्ख्यानां योगिनां चापि यतीनामात्मवेदिनाम्।
मनीषितं विजानाति केशवो न तु तस्य ते॥ 90 ॥

ये केचित् सर्वलोकेषु दैवं पित्र्यं च कुर्वते।
दानानि च प्रयच्छन्ति तप्यन्ते च तपो महत्॥ 91 ॥

सर्वेषामाश्रयो विष्णुरैश्वरं विधिमास्थितः।
सर्वभूतकृतावासो वासुदेवेति चोच्यते॥ 92 ॥

अयं हि नित्यः परमो महर्षिः
महाविभूतिर्गुणवान्गुणाख्यः।
गुणैश्च संयोगमुपैति शीघ्रं
कालो यथर्तावृतुसम्प्रयुक्तः॥ 93 ॥

नैवास्य विन्दन्ति गतिं महात्मनो
न चागतिं कश्चिदिहानुपश्यति।
ज्ञानात्मकाः संयमिनो महर्षयः
पश्यन्ति नित्यं पुरुषं गुणाधिकम्॥ 94 ॥

॥ इति श्री हयशिरोपाख्यानं समाप्तम्॥